STOTRADHWANI

LEARN CORRECTLY, CHANT CONFIDENTLY

# श्रीशिवाष्टोत्तर शतनाम स्तोत्रम्

शिवो महेश्वर श्शम्भुः पिनाकी शशिशेखरः ।
वामदेवो विरूपाक्षः कपर्दी नीललोहितः ॥ १॥

शङ्कर श्शूलपाणिश्च खट्वाङ्गी विष्णु वल्लभः ।
शिपिविष्टोऽम्बिकानाथः श्रीकण्ठो भक्त वत्सलः ॥ २॥

भवश्शर्व स्त्रिलोकेशः शितिकण्ठ श्शिवाप्रियः ।
उग्रः कपाली कामारिः अन्धकासुर सूदनः ॥ ३॥

गङ्गाधरो ललाटाक्षः कालकालः कृपानिधिः ।
भीमः परशु हस्तश्च मृगपाणि र्जटाधरः ॥ ४॥

कैलासवासी कवची कठोर स्त्रिपुरान्तकः ।
वृषाङ्को वृषभारूढो भस्मोद् धूलित विग्रहः ॥ ५॥

सामप्रिय स्स्वरमय स्त्रयीमूर्ति रनीश्वरः ।
सर्वज्ञः परमात्मा च सोमसूर्याग्नि लोचनः ॥ ६॥

हविर् यज्ञमय स्सोमः पञ्चवक्त्रस् सदाशिवः ।
विश्वेश्वरो वीरभद्रो गणनाथः प्रजापतिः ॥ ७॥

हिरण्यरेता दुर्धर्षः गिरीशो गिरिशोऽनघः ।
भुजङ्ग भूषणो भर्गो गिरिधन्वा गिरिप्रियः ॥ ८॥

कृत्तिवासा पुरारातिर् भगवान् प्रमथाधिपः ।
मृत्युञ्जयस्सूक्ष्म तनुर् जगद्व्यापी जगद्गुरुः ॥ ९॥

व्योमकेशो महासेन जनकश्चारु विक्रमः ।
रुद्रो भूतपतिः स्थाणुर् अहिर्भुध्न्यो दिगम्बरः ॥ १०॥

अष्टमूर्ति रनेकात्मा सात्त्विक श्शुद्ध विग्रहः ।
शाश्वतः खण्ड परशुर् अजः पाश विमोचकः ॥ ११॥

मृडः पशुपतिर् देवो महादेवोऽव्ययो हरिः ।
पूषादन्त भिदव्यग्रो दक्षाध्वरहरो हरः ॥ १२॥

भगनेत्रभि दव्यक्तः सहस्राक्षस् सहस्रपात् ।
अपवर्ग प्रदोऽनन्तः तारकः परमेश्वरः ॥ १३॥

एवं श्री शंभुदेवस्य नाम्नां अष्टोत्तरं शतम् ॥

इति श्रीशिवाष्टोत्तर शतनाम स्तोत्रं समाप्तम् ॥